उपशास्त्री साहित्यम् - तृतीय-पत्रम्
द्वितीय-खण्ड काव्यदीपिका

Saathi

Date ___/___/_____

प्र० (1) प्रस्तावना रूपम् लिखत ?

उत्तरम् → नटी विदूषको वापि पारिपार्श्वक एव वा
सूत्रधारेण सहिता संलापं यत्र कुर्वते ।
चित्रैर्वाक्यैः स्वकार्योत्थैः प्रस्तुताक्षेपिभिर्मिथ ।
आमुखं तत्तु विज्ञेयं नाम्ना प्रस्तावनाऽपि सा ॥

प्र० (2) → श्रव्यकाव्यस्य लक्षणं लिखत् ।

उत्तरम् → श्रव्य श्रोतव्यमात्रं तत् परिकीर्तितम ।
पद्यं गद्यञ्च मिश्रञ्च पद्यं चतुष्पदी मतम् ।
जाति वृत्तामिति द्वेधा जातिर्मात्राकृतेन तत् ।
वृत्तमक्षर संख्यातं पद्यैनैकेन मुक्तकम् ॥
द्वाभ्यान्तु युग्मकं ज्ञेयं त्रिभिः श्लोकैर्विशेषकम् ।
कलापकं चतुर्भिः स्यात् तदूर्ध्वं कुलकं स्मृतम् ॥

पद्यमयस्य महाकाव्यस्य लक्षणमुक्तं काव्यादर्शे —
सर्गबन्धो महाकाव्यमुच्यते तस्य लक्षणम् ।
आशीर्नमस्क्रिया वस्तुनिर्देशो वाऽपि तन्मुखम् ॥
इतिहासकथोद्भूतमितरद्वा सदाश्रयम् ।
चतुर्वर्गफलोपेतं चतुरोदात्त नायकम् ॥
नगरारण्यशैलर्तुचन्द्रसूर्योऽऽदिवर्णनैः ।
अलङ्कृतमसंक्षिप्तरसभावनिरन्तरम् ॥
सर्गैरनातिविस्तीर्णैः श्रव्यवृत्तैः सुसन्धिभिः ।
सर्वत्र भिन्नवृत्तान्तैरुपेतं लोकरञ्जकम् ॥
काव्यं कल्पान्तरस्थायि जायते सदलङ्कृतिः ।

यथा — रामायण, रघुवंश, शिशुपालवध, नैषधीयचरिता-ऽऽदयः ।

राधा उमाकान्त सं० महावि०
सुखसेना पूर्णिया ।

Renu Devi
08 / 06 / 21

शास्त्री साहित्यम् - अभिज्ञानशाकुन्तलम्
प्रथम-खण्ड
महत्वपूर्णः लघूत्तरीयाणि प्रश्नोत्तराणि

प्र० ① नाटकस्य किं लक्षणम् ?
उत्तरम् → नाटकं ख्यातवृत्तं स्यात्पञ्चसन्धिसमन्वितम् । इयं लक्षणमुक्तं साहित्यदर्पणे ।

प्र० ② शकुन्तलायाः लाभे सन्दिहानो राजा किं चिन्तयति ?
उत्तरम् → शकुन्तलायाः लोकोत्तरं लावण्यं सञ्चिन्त्य तल्लाभे सन्दिहानो राजा दुष्यन्तो नर्मसचिवं विदूषकं प्रति कथयति —

अनाघ्रातं पुष्पं किसलयमलूनं कररुहै-
रनाविद्धं रत्नं मधु नवमनास्वादितरसम् ।
अखण्डं पुण्यानां फलमिव च तद्रूपमनघं
न जाने भोक्तारं कमिह समुपस्थास्यति विधिः ॥

प्र० ③ सुरयुवतयः कुत्र विजयम् आशंसन्ते ?
उत्तर → दैत्यैः बद्धवैराः सुरयुवतयः दुष्यन्तस्य अधिज्ये धनुषि पौरुहूते वज्रे च विजयं आशंसन्ते ।

प्र० ④ 'परिहासविजल्पितं सखे' इति राजा कथं कथयति ?
उत्तरम् → शकुन्तलाविषयकमनुरागं प्रच्छादयन् तस्याः स्वाभिलाषानर्हत्वं च समर्थन् राजा दुष्यन्तो विदूषकं ब्रूते —

क्व वयं क्व परोक्षमन्मथो मृगशावैः सममेधितो जनः ।
परिहासविजल्पितं सखे परमार्थेन न गृह्यतां वचः ॥

प्र० ⑤ विष्कम्भकस्य किं लक्षणम् ?
उत्तरम् → वृत्तवर्तिष्यमाणानां कथांशानां निदर्शकः ।
सङ्क्षिप्तार्थस्तु विष्कम्भ आदावङ्कस्य दर्शितः ॥

प्र० ⑥ राजा दुष्यन्तः कथं विघ्नानपोहति ?
उत्तरम् — राजा दुष्यन्तः धनुषः हुङ्कारेणैव विघ्नानपोहति ।

राधा उमाकान्त सं० महावि०
सुखसेना, पूर्णिया ।

Renu Devi
08/06/21

Date ___ / ___ / ______

प्र० ① ध्वन्यादि काव्यस्य भेदोपभेदाश्च लिखत ?

उत्तरम् → ध्वनिर्गुणीभूतव्यंग्यं चित्रमिति त्रिधा ।

ध्वनिं लक्षयति विश्वनाथ – "वाच्यातिशायिनि व्यंग्ये ये ध्वनिस्तत्काव्यमुत्तमम् ।।"

यस्मिन् काव्ये व्यंग्यार्थो वाच्यार्थादधिकचमत्कारी, तन्नाम ध्वनिः तच्च उत्तमं काव्यम् ।

ध्वनि भेदः — "भेदौ ध्वनेरपि द्वावुदीरितौ लक्षणाऽभिधामूलौ ।
अविवक्षितवाच्योऽन्यो विवक्षितान्यपरवाच्यश्च ।।"

लक्षणामूलाभिधामूलौ (अविवक्षितवाच्यविवक्षितान्य परवाच्यौ)। लक्षणामूलाभिधामूलश्चेति ध्वनौ द्वौ भेदौ, तौ च क्रमेण अविवक्षितवाच्यः विवक्षितवाचो नाम लक्षणामूलो ध्वनिः लक्षणामूलत्वादवात्र वाच्यमविवक्षितम् ।

अविवक्षितवाच्यस्य भेदानाह – स च द्विविधः अर्थान्तरसंक्रमितवाच्यः अत्यन्ततिरस्कृतवाच्यश्च । यदाह विश्वनाथः —

" अर्थान्तरं संक्रमिते वाच्येऽत्यन्तं तिरस्कृते ।
अविवक्षितवाच्योऽपि ध्वनिर्द्विविधमृच्छति ।।"

अर्थान्तरसंक्रमितवाच्यमाह – यत्र स्वयमनुपयुज्यमाणो मुख्योऽर्थः स्वविशेषरूपे अर्थान्तरे परिणमति, तत्र मुख्यार्थस्य स्वविशेषरूपेऽर्थान्तरे संक्रमितत्वादर्थान्तरसङ्क्रमितवाच्यम् । यथा —

" त्वामस्मि वच्मि विदुषां समवायोऽत्र तिष्ठति ।
आत्मीयां मतिमास्थाय स्थितिमात्र विधेहि तत् ।।"

अत्र वचनादि उपदेशादिरुपतया परिणमति, सम्बोध्य आत्मीय भावाद्यतिशयश्च व्यंग्यः ।

Renu Devi
08 / 06 / 21

राधा उमाकान्त सं० महावि०
सुखसेना, पूर्णिया ।

साहित्यम् शास्त्री तृतीय खंड

मेघदूतम्, परीक्षोपयोगी व्याख्या

तन्वी श्यामा शिखरिदशना पक्वबिम्बाधरोष्ठी
मध्ये क्षामा चकितहरिणीप्रेक्षणा निम्ननाभिः।
श्रोणीभारादलसगमना स्तोकनम्रा स्तनाभ्यां
या तत्र स्याद्युवतिविषये सृष्टिराद्येव धातुः

प्रसङ्गश्च – अयं श्लोकः महाकविकालिदासप्रणीतस्य खण्डकाव्यस्योत्तरमेघस्यास्ति। अत्र यक्षः सङ्केतेन स्वगृहे विरहदुःखार्तां स्वपत्नीं मेघम्प्रति वर्णयति।

अन्वयः – तन्वी श्यामा शिखरिदशना पक्वबिम्बाधरोष्ठी मध्येक्षामा चकितहरिणीप्रेक्षणा निम्ननाभिः श्रोणीभारात् अलसगमना स्तनाभ्यां स्तोकनम्रा, युवतिविषये धातुः आद्या सृष्टिरिव या तत्र स्यात्।

व्याख्या – (हे मेघ!) तन्वी = कृशशरीरा, श्यामा = युवतिः, शिखरिदशना = पक्वदाडिमबीजदन्ता, पक्वबिम्बाधरोष्ठी = परिणतबिम्बफलोष्ठी, मध्येक्षामा = कृशोदरी, चकितहरिणीप्रेक्षणा = भयापन्नमृगनयनी, निम्ननाभिः = गभीरनाभिः, श्रोणिभारात् = नितम्बस्थौल्यात्, अलसगमना = मन्दगामिनी, स्तनाभ्यां = कुचाभ्याम्, स्तोकम् = ईषत् नम्रा = अवनता युवतिविषये = सुन्दरीसमाजे, धातुः = ब्रह्मणः, आद्या = प्रथमा, सृष्टिः = निर्मितिरिव या, तत्र = मम गृहे, स्यात् तामेव मत्कथाविषयीभूतां जानीथाः = जानीहि इति परेण श्लोकेनान्वयः। श्लक्ष्णं दभ्रं कृशं तनुः।' इत्यमरः। श्यामा यौवन-मध्यस्था। इत्युत्पलमाला। शिखरं शैलवृक्षाग्रकक्षापुलककोटिषु इति विश्वः। चकितहरिणीप्रेक्षणेत्यत्र लुप्तोपमाऽलङ्कारस्तथा प्रियाविरहप्रसङ्गे "सृष्टि-राद्येव" इत्यत्रोत्प्रेक्षाऽलङ्कारः। तस्मादुभयोः संसर्गात् संसृष्टिरलङ्कारो बोध्यः। मन्दाक्रान्ता छन्दः।

राधा उमा कान्त सं० मुहविद्या० सुखसेना, पूर्णिया

Renu Devi
08/06/21